"विवर्त्तिते पार्श्वरुजश्च तीव्रा-
स्तिर्य्यग्गते तीव्ररुजो भवन्ति ।
क्षिप्तेऽतिशूलं विषमञ्च सक्थ्नो-
क्षिप्ते व्यधो रुक् विघटश्च सन्धेः ॥"

विवर्त्तिते सन्धावसुक्ते । अस्थिद्वयोपरिवर्त्तिते पार्श्वरुजः सन्धिस्थितास्थिखण्डद्वयपार्श्वयो रुजः । तिर्य्यग्गते सन्धिगते । एकस्मिन्नस्थ्नि सन्धिस्थानं त्यक्त्वा तिर्य्यग्गते क्षिप्ते सक्थ्नोः ऊरुसन्ध्योः । एकस्मिन्नस्थ्नि परस्यास्थ्न उपरिगते । सक्थ्नोः अतिशूलं तत्र विषमं कदाचिदधिकं कदाचिन्न्यूनम् । अधःक्षिप्ते सन्धिगते एकस्मिन्नस्थ्नि अधोगते । रुक् सन्धेर्विघटः विघटनञ्च ॥ * ॥ काण्डभग्नमाह । भग्नञ्च काण्डे बहुधा प्रयाति विशेषतो नामभिरेव तुल्यम् । भग्नं काण्डे काण्डविषये बहुधा बहुभिः प्रकारैः प्रयाति । अत्र बहुविधत्वं द्वादशविधत्वं बोद्धव्यम् । बहुविधस्य काण्डभग्नस्य पृथक् लक्षणं नोक्तं किन्तु काण्डनामभिरेव तुल्यत्वम् । कर्कटकादिनामानुरूपमेव लक्षणं किन्तु नामभिरेव बोद्धव्यम् ॥ * ॥ तान् प्रकारानाह ।

"काण्डे त्वतः कर्कटकाश्वकर्णौ
विचूर्णितं पिच्चितमस्थि छल्लितम् ।
काण्डेषु भग्नं ह्यतिपातितञ्च
मज्जागतं विस्फुटितञ्च वक्रम् ॥"

छिन्नं द्विधा द्वादशधा च काण्डे । अतः सन्धिभग्नानन्तरं काण्डे काण्डभग्नं तदाह । कर्कटकः अस्थिविश्लेषपूर्व्वको मध्ये प्रोन्नतः पार्श्वयोरवनतः कर्कटतुल्यरूपत्वात् कर्कटः । अश्वकर्णः अश्वकर्णवद्विपुलास्थिनिर्गमादश्वकर्णः । विचूर्णितं चूर्णितमस्थि तच्च शब्दस्पर्शाभ्यां बोद्धव्यम् । पिच्चितमस्थि नियन्त्रितं बहुशोथम् । छल्लितं विश्लिष्टं सत्वक्स्रवम् । काण्डेषु भग्नं काण्डभग्नम् । यद्यपि कर्कटकादि सर्व्वमेव काण्डभग्नं तथापि इयं काण्डभग्नसंज्ञाविशिष्टा । अत्र भग्नं भङ्गः त्रुटिः तेन सर्व्वथा त्रुटितं पृथग्भूतं त्वचि स्थितं यत्र काण्डं तत्काण्डभग्नम् । अतिपातितं अशेषेण छित्त्वा पातितमस्थि । मज्जागतं अस्थ्यवयवोऽस्थिमध्ये प्रविश्य मज्जानं गतम् । विस्फुटितं स्तोकविदीर्णं वक्रं स्थानं त्यक्त्वा कुब्जीभूतम् । छिन्नं द्विधा एकं विदीर्णं सत् लग्नं अपरं विदीर्णं द्विधाभूतम् । द्वादशधा च काण्डे । काण्डे च भग्नं द्वादशधेत्यन्वयः । तच्चोक्तमेवं कर्कटकादि ॥ * ॥ काण्डभग्नस्य सामान्यं लक्षणमाह ।

"स्रस्ताङ्गता शोथरुजातिवृद्धिः
संपीड्यमाने भवतीह शब्दः ।
स्पर्शासहं स्पन्दनतोदशूलं
सर्व्वास्ववस्थासु न शर्म्मलाभः ॥"
भग्नस्य काण्डे खलु चिह्नमेतत् ॥"

स्पर्शासहमिति काण्डभग्नस्य विशेषणं स्पन्दनं नाड़ीनां स्फुरणं शूलं शूलेनेव यथा । रुजा सामान्या पीड़ा । सर्व्वास्ववस्थासु शयनासनादिषु ॥ कष्टसाध्यमाह ।

"अल्पाशिनोऽनात्मवतो जन्तोर्वातात्मकस्य च ।
उपद्रवैर्वा जुष्टस्य भग्नं कृच्छ्रेण सिध्यति ॥"

अनात्मवतो रोगप्रतीकारे यत्नरहितस्य । वातात्मकस्य च वातप्रकृतेः । उपद्रवैः ज्वराध्मानमोहमूत्रपुरीषसङ्गादिभिः ॥ * ॥ असाध्यमाह ।

"भिन्नं कपालं कट्यान्तु सन्धिमुक्तं तथा च्युतम् ।
जघनं प्रतिपिष्टञ्च वर्जयेत्तच्चिकित्सकः ॥"

कपालं जानुनितम्बांसगण्डतालुशङ्खवङ्क्षणशिरोऽस्थीनि कपालानि तथा च्युतं तथा च्छिन्नम् । प्रतिपिष्टं उत्पिष्टम् ॥ पुनरसाध्यमाह ।

"असंश्लिष्टकपालञ्च ललाटे चूर्णितञ्च यत् ।
भग्नं गुदे स्तने पृष्ठे शङ्खे मूर्द्धनि वर्ज्जयेत् ॥"

असंश्लिष्टकपालमिति भग्नविशेषणम् । स्तने स्तनयोरन्तरे उरसि । मूर्द्धनि चूड़ास्थाने ॥ * ॥ अपरमप्यसाध्यमाह ।

"सम्यक्संहितमप्यस्थि दुर्न्यासाद्दुष्टबन्धनात् ।
संक्षोभाद्वापि यद्गच्छेद्विक्रियां तच्च वर्ज्जयेत् ॥"

सम्यक्संहितमपि सम्यग्योजितमपि अस्थि दुर्न्यासात् दुःस्थापनात् संन्यस्तमपि दुष्टबन्धनात् सुबद्धमपि संक्षोभात् अभिघातादिना सञ्चलनात् यद्विक्रियां गच्छेत् विकृतं भवति तद्वर्ज्जयेत् ॥ अस्थिविशेषेण भग्नविशेषमाह ।

"तरुणास्थीनि नम्यन्ते भिद्यन्ते नलकानि तु ।
कपालानि विभज्यन्ते स्फुटन्ति रुचकानि च ॥"

तरुणास्थीनि घ्राणकर्णाक्षिगुदेषु कोमलास्थीनि नम्यन्ते वक्रीभवन्ति । तेनात्र वक्रतालक्षणं भग्नम् । नलकानि नलादीनि नाड़ीवत् सरन्ध्राण्यस्थिपर्व्वाणि भिद्यन्ते अस्थ्यन्तराणुप्रवेशाद्विदीर्य्यन्ते । कपालानि जानुनितम्बांसगण्डतालुशङ्खशिरोऽस्थीनि विभज्यन्ते स्फुटन्ति रुचकानि दन्ताः स्फुटन्ति त्रुटन्ति । अस्थीनि तरुणानलककपालरुचकवलयभेदात् पञ्चविधानि । तत्र रुचकानि चेति । चकाराद्वलयान्यपि त्रुटन्तीति बोद्धव्यम् ।

"पाण्योः पार्श्वयुगे पृष्ठे वक्षोजठरपायुषु ।
पादयोरपि चास्थीनि वलयानि बभाषिरे ॥"

अथ भग्नस्य चिकित्सा ।

"भग्ने लेपाय मञ्जिष्ठामधुकञ्चाम्लपेषितम् ।
शतधौतघृतोन्मिश्रं शालिपिष्टञ्च लेपनम् ॥"

लेपात् पिच्छिलवर्णैरम्लीका फलरसाभ्यां वा । सद्योऽभिघातजनिता रागरुजा श्वयथवः प्रशाम्यन्ति ।

"सघृतञ्चास्थिसंहारं लाक्षागोधूममर्ज्जुनम् ।
सन्धिभग्नेऽस्थिसम्भग्ने पिबेत् क्षीरेण वा पुनः ॥"

घृतेन पिबेत् क्षीरेण वेत्यर्थः । अस्थिसंहारः हड़्सिंहार इति लोके ।

"रसोनमधुलाक्षाज्यसिताकल्कं समश्नतः ।
छिन्नभिन्नच्युतास्थ्नाञ्च सन्धानमचिराद्भवेत् ॥"

"लाक्षास्थिसंहृत् ककुभाश्वगन्धा
चूर्णीकृता नागबला पुरश्च ।
संभग्नमुक्तास्थिरुजो निहन्या-
दङ्गानि कुर्य्यात् कुलिशोपमानि ॥"

अस्थिसंहृत् हड़्सिंहार । लाक्षादिगुग्गुलुः ॥

"मांसं मांसरसः क्षीरं सर्पिर्यूषः कलायजः ।
बृंहणञ्चान्नपानञ्च देयं भग्नाय जानता ॥
लवणं कटुकं क्षारं मद्यं मैथुनमातपम् ।
रूक्षमन्नं श्रमञ्चापि भग्नः सेवेत न क्वचित् ॥"

इति भावप्रकाशे भग्नाधिकारः ॥

(अथास्य निदानं यथा । पतनपीड़नप्रहाराक्षेपणव्यालमृगदशनप्रभृतिभिरभिघातविशेषैरनेकविधमस्थ्नां भङ्गमुपदिशन्ति तत्तु भङ्गजातमनुसार्य्यमाणं द्विविधमेवोत्पद्यते सन्धिमुक्तं काण्डभग्नञ्च ॥ इति सुश्रुते निदानस्थाने पञ्चदशेऽध्याये ॥

अथ भग्नचिकित्सा ।

"भग्नास्थिञ्च नरं दृष्ट्वा तस्य वक्ष्यामि भेषजम् ।
मणिबन्धे कूर्परे च जानौ भग्ने कटौ तथा ॥
पृष्ठवंशे विभग्ने च साध्यान्येतानि सप्तम ! ।
ग्रीवादेशे चेन्द्रबस्तौ रोहिण्यां कूर्परादधः ॥
स्कन्धकूर्परमध्ये च तथा च त्रिकमध्यतः ।
उरसि क्रोड़के चैव विभग्नं तदसाध्यकम् ॥
विभग्नञ्च नरं दृष्ट्वा वेणुखण्डेन बन्धयेत् ।
म्रक्षयेन्नवनीतेनैरण्डपत्रेश्च वेष्टयेत् ॥
उष्णाम्भसा सेचयेच्च वस्त्रेण मृदु बन्धयेत् ।
धवार्ज्जुनकदम्बानां वल्कलं काञ्जिकेन तु ॥
पिष्ट्वा हितः प्रलेपश्च तेन सौख्यं प्रजायते ।
स्वेदयेत्तानि चोष्णेन आवासं कारयेत् पुनः ॥
एवं क्रिया समाप्तौ ततो बन्धं विमोचयेत् ।
एकाहान्तरिते नापि पूर्व्ववत्तत् प्रबन्धयेत् ॥
यावद्ग्रन्थिं न बध्नाति तावन्न स्नापयेन्नरम् ॥"

इति हारीते चिकित्सितस्थाने । ५६ अः ॥

अथ पथ्यविधिः ।

"शीताम्बुसेचनं पङ्कप्रदेहो बन्धनक्रिया ।
शालिप्रियङ्गुगोधूमा यूषो मुद्गसतीलयोः ॥
नवनीतं घृतं क्षीरं तैलं मांसरसो मधु ।
पटोलं लशुनं शिग्रु पत्तूरो बालमूलकम् ॥
द्राक्षा धात्री वज्रवल्ली लाक्षा यच्चापि बृंहणम् ।
तत्सर्व्वं भिषजा नित्यं देयं भग्नाय जानता ॥"

अथापथ्यविधिः ।

"लवणं कटुकं क्षारमम्लं मैथुनमातपम् ।
व्यायामञ्च न सेवेत भग्नो रूक्षान्नमेव च ॥"

इत्यायुर्व्वेदपथ्यापथ्यग्रन्थस्य भग्नाधिकारे ॥)

भग्नपादर्क्षं, क्ली, (भग्नपदं ऋक्षम् ।) पुष्कराख्यनक्षत्रषट्कम् । यथा,—

"पुनर्व्वसूत्तराषाढ़ा कृत्तिकोत्तरफल्गुनी ।
पूर्व्वभाद्रं विशाखा च षड़ेते पुष्कराः स्मृताः ॥
भग्नपादर्क्षसंयोगात् द्वितीया द्वादशी यदि ।
सप्तमी चार्कमन्दारे जायते जारजो ध्रुवम् ॥"

इति ज्योतिस्तत्त्वम् ॥